तस्यापि न भवेन्मन्त्रः कार्य्यसिद्धौ कदाचन ।”
इति जैमिनिभारते आश्वमेधिकपर्व्वणि २ अः ॥
अन्यत् मन्त्रशास्त्रे द्रष्टव्यम् ॥ * ॥ देवादीनां साधनम् । इति मेदिनी । रे, ७४ ॥
“तन्मन्त्राद्यक्षरोक्तं यत् तृतीयाद्यगोचरम् ।
रहस्यालोचनं मन्त्रो रहस्यमनुपकरम् ॥”
इति हेमचन्द्रः ॥
मन्त्रव्याख्यातृदेकनवत्यृषयो यथा,—
“एते मन्त्रकृतः सर्व्वे कृत्स्नशस्तु निबोधत ।
भृगुः काव्यः प्रचेताश्च दधीचो ह्यात्मवानपि ॥
और्व्वोऽथ जमदग्निश्च विदः सारस्वतस्तथा ।
आर्ष्टिषेणो च्यवनश्च वीतहव्यः सवेधसः ॥
वैण्यः पृथुर्दिवोदासो वध्र्यश्वो गृत्सशौनकः ।
एकोनविंशतिर्ह्येते भृगवो मन्त्रकृत्तमाः ॥१६॥
अङ्गिरा वेधसश्चैव भरद्वाजो नभात्मकः ।
तथा ऋगाधरो गर्गः सितिः सङ्कृतिरेव च ॥
गुरुवीतश्च मान्धाता अम्बरीषस्तथैव च ।
युवनाश्वः पुरुकुत्सः समदस्युः सदस्यवान् ॥
अजमीढो ह्यहार्य्यश्च तत्क्षकः कविरेव च ।
पृषदश्वो विरूपश्च कण्वश्चैवाथ मुद्गलः ॥
उतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि ।
अयास्योऽथ सुचित्तिश्च वामदेवस्तथैव च ॥
औषिजो बृहच्छुक्तिश्च ऋषिर्दीर्घतपा अपि ।
काचीवांश्च त्रयस्त्रिंशत् स्मृता ह्याङ्गिरसा वराः ॥ ३३ ॥
एते मन्त्रकृतः सर्व्वे काश्यपांस्तु निबोधत ।
काश्यपः सहवत्सारो निध्रुवो रैभ्य एव च ।
असितो देवलश्चैव षडेते ब्रह्मवादिनः ॥ ६ ॥
अत्रिर्वेद्धस्वनश्चैव श्यावाश्वोऽथ गविष्ठिरः ।
कर्णकौ ऋषिः सिद्धस्तथा पूर्व्वातिथिश्च यः ॥
इत्येते अत्रयः प्रोक्ता मन्त्रकृतस्तु महर्षयः ॥४॥
वशिष्ठश्चैव शक्तिश्च तृतीयश्च पराशरः ।
ततस्तु इन्द्रप्रमतिः पञ्चमस्तु भरद्वसुः ॥
षष्ठस्तु मित्रावरुणिः सप्तमः कुण्डिनस्तथा ।
इत्येते सप्त विज्ञेया वाशिष्ठा ब्रह्मवादिनः ॥७॥
विश्वामित्रश्च गाधेयो देवरातस्तथोद्गलः ।
तथा विद्वान् मधुच्छन्दो ऋषिश्चान्योऽघमर्षणः ॥
अष्टको लोहितश्चैव भूतकीलश्च तावुभौ ।
देवश्रवा देवरातः पुराणश्च धनञ्जयः ॥
शिशिरश्च महातेजाः शालङ्कायन एव च ।
त्रयोदशैते विज्ञेया ब्रह्मिष्ठाः कौशिका वराः॥१३॥
अगस्त्योऽथ दृढद्युम्न इन्द्रबाहुस्तथैव च ।
ब्रह्मिष्ठागस्तयो ह्येते त्रयः परमकीर्त्तयः ॥ ३॥
मनुर्वैवस्वतश्चैव इलो राजा पुरूरवाः ।
क्षत्त्रियाणां वरा ह्येते विज्ञेया मनुवादिनः ॥३॥
भलन्दश्चैव भल्सश्च वत्सलश्चैव ते त्रयः ।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः स्मृताः॥३
इत्येकनवतिः प्रोक्ता मन्त्रा यैश्च बहिष्कृताः ।
ब्राह्मणाः क्षत्त्रिया वैश्या ऋषिपुत्त्रास्तथा स्मृताः।
ऋषीकाश्च सुता ह्येते ऋषिपुत्त्राः श्रुतर्षयः ॥”
इति मात्स्ये १२१ अध्यायः ॥
कृष्णमन्त्रमाहात्म्यं यथा,—
“तावन्निबद्धः संसारकारागारे विधेर्जनः ।
न यावत् कृष्णमन्त्रञ्च प्राप्नोति गुरुवक्त्रतः ॥
कृतकर्म्मभोगरूपनिगडोच्छेदकारणम् ।
मायाजालोच्छेदकरमाशापाशनिकृन्तनम् ॥
गोलोकमार्गसोपानं निस्तारबीजकारणम् ।
भक्त्यङ्कुरस्वरूपञ्च नित्यं हृद्यमनश्वरम् ॥
सारञ्च सर्व्वतपसां योगानाञ्च तथैव च ।
सिद्धीनां वेदपाठानां व्रतादीनाञ्च निश्चितम् ॥
दानानां तीर्थस्नानानां यज्ञादीनां पुरन्दर ! ।
जपानासुपवासानामित्याह कमलोद्भवः ॥
पुंसां लक्षं पितृणाञ्च शतं मातामहस्य च ।
पूर्व्वं परञ्च तत्संख्यं पितरं मातरं गुरुम् ॥
सहोदरं कलत्रञ्च बन्धुं शिष्यञ्च किङ्करम् ।
ससुहरेच श्वशुरं श्वश्रूं कन्याञ्च तत्सुतम् ॥
आत्मानञ्च सतीर्थञ्च गुरुपत्नीं गुरोः सुतम् ।
उद्धरेद्बलवान् भक्तो मन्त्रग्रहणमात्रतः ॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ।
तत्स्पर्शपूतस्तीर्थौघः सद्यः पूता वसुन्धरा ॥
अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ।
तदान्यदेवमन्त्रञ्च लभते पुण्यशेषतः ॥ * ॥
सप्तजन्मोपदेवानां कृत्वा सेवां स्वकर्म्मतः ।
लभते च रवेर्मन्त्रं साक्षिणः सर्व्वकर्म्मणाम् ॥
जन्मत्रयं भास्करञ्च निषेव्य मानवः शुचिः ।
लभेद्गणेशमन्त्रञ्च सर्व्वविघ्नहरं परम् ॥
जन्मत्रयं तं निषेव्य निर्व्विघ्नश्च भवेन्नरः ।
विघ्नेशस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥
तदा ज्ञानप्रदीपेन समालोच्य महामतिः ।
अज्ञानान्धतमो हित्वा महामायां भजेन्नरः ॥
विष्णुमायाञ्च प्रकृतिं दुर्गां दुर्गतिनाशिनीम् ।
सिद्धिदां सिद्धिरूपाञ्च परमां सिद्धयोगिनीम् ॥
वाणीरूपाञ्च पद्माञ्च भद्रां कृष्णप्रियात्मिकाम् ।
नानारूपां तां निषेव्य जन्मनां शतकं नरः ॥
तत्प्रसादाद्भवेत् ज्ञानी ज्ञानानन्दं ततो भजेत् ।
कृष्णज्ञानाधिदेवञ्च महाज्ञानं सनातनम् ॥
शिवं शिवस्वरूपञ्च शिवदं शिवकारणम् ।
परमानन्दरूपञ्च परमानन्ददायिनम् ॥
सुखदं मोक्षदश्चैव दातारं सर्व्वसम्पदाम् ।
अमरत्वप्रदश्चैव दीर्घायुष्ट्वप्रदं परम् ॥
इन्द्रत्वञ्च मनुत्वञ्च दातुं शक्तञ्च लीलया ।
राजेन्द्रत्वप्रदश्चैव ज्ञानदं हरिभक्तिदम् ॥
जन्मत्रयं समाराध्य चाशुतोषप्रसादतः ।
सर्व्वदस्य वरेणैव निर्म्मलं ज्ञानमालभेत् ॥
निर्म्मलज्ञानदीपेन सुप्रदीपेन तत्त्ववित् ।
ब्रह्मादितृणपर्य्यन्तं सर्व्वं मिथ्यैव पश्यति ॥
दयानिधेः प्रसादेन शङ्करस्य महात्मनः ।
वरदस्य वरेणैव हरिभक्तिं लभेत् ध्रुवम् ॥
तदा तद्भक्तसंसर्गात् कृष्णमन्त्रं लभेत् ध्रुवम् ।
तदा निष्कृतिमाप्नोति सारात्सारां परात्पराम् ॥
यत्र देहे लभेन्मन्त्रं तद्देहावधि भारते ।
तत् पाञ्चभौतिकं त्यक्त्वा बिभर्त्ति दिव्यरूपकम् ॥
करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ।
परमानन्दसंयुक्तो मोहादिषु विवर्ज्जितः ॥
न विद्यते पुनर्जन्म पुनरागमनं सुर ! ।
पुनश्च न पिबेत् क्षीरं हृत्वा मातृस्तनं परम् ॥
विष्णुमन्त्रोपासकानां गङ्गादितीर्थसेविनाम् ।
स्वधर्म्मिणाञ्च भिक्षूणां पुनर्जन्म न विद्यते ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
शिवमन्त्रा यथा,—
“प्रथमं ब्रह्म तन्मन्त्रं ततोऽनुध्यानगोचरम् ।
ततः क्रमन्तु पूजायाः क्रमाद्विशं नरर्षभौ ।
समस्तानां स्वराणान्तु दीर्घाः शेषाः सबिन्दुकाः ।
ऋ ॠ ऌ ॡ शून्याः सार्द्धचन्द्रा उपान्ते नाभिसंज्ञिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रः पञ्चवक्त्रस्य कीर्त्तितः ।
क्रमात् सद्यस्सन्दोहमादगौरवसंज्ञकाः ॥
प्रासादस्तु भवेत् शेषः पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं समुदितं कृत्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ।
सद्यसादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ॥
शम्भोः प्रसादनेनैव यस्मादृहतस्तु मन्त्रकः ।
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्म्मन्त्रः सद्य उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतद्व्यस्तं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
युवां तेनैव मन्त्रेण आराधय तमीश्वरम् ॥ ”
इति कालिकापुराणे ५० अध्याये वेतालभैरवौ प्रति वशिष्ठवाक्यम् ॥ * ॥
मन्त्रस्य त्रिविधजपो यथा,—
“वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ॥
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद्व्यक्तं जपयज्ञः स वाचिकः ॥
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
तेन स्वरादिसुव्यक्तवर्णोच्चारणवान् वाचिकः ।
स्वयंशब्दग्रहणमात्रयोग्यकिञ्चिच्छब्दवानुपांशुः ।
जिह्वौष्ठचालनमन्तरेण वर्णानुसन्धानात्मको मानसः ॥”* ॥
वाचिकेऽप्युच्चैर्जपनिषेधमाह शङ्खः ।
“नोच्चैर्जप्यं बुधः कुर्य्यात् सावित्र्यास्तु विशेषतः ।”
योगियाज्ञवल्क्यः ।
“न चंक्रमन् न विहसन् न पार्श्वमवलोकयन् ।
नोपाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
न पदा पादमाक्रम्य न वै बहिः करौ स्मृतौ ।
नैवंविधं जपं कुर्य्यात् न च संश्रावयेज्जपम् ॥
उत्तिष्ठन् वीक्ष्यमाणोऽर्कमासीनः प्राङ्मुखो जपेत् ।
प्राक् कुशेष्वेवमासीनो वसानो वाससी शुभे ॥”